केन्द्रीयसंस्कृतविद्यापीठ
श्रीनगरकेन्द्र

नो. ११ 33 s.n 12

स्वातन्त्र्यदीपिकासूत्र सटीक

manasaaraamak.rtaa

सर्वाध्वात्माद्दढे तस्मिन् देहयन्त्रे चिदात्मना प्रेर्यमाणो विचरति भस्त्रायन्त्रगवायुवत् ।

क्षये तु कर्मणां तेषां देहयन्त्रेऽन्यथागते प्राणयन्त्रं विघटते देहः स्यात् कुड्यवत् तत इति ॥

परः प्रमाताविनाशी ॥

तयोः साक्षिभूतः चिदानन्दरूपः प्रत्यगात्मा सर्वोपनिषद् गीयमानोऽन्वयव्यतिरेकाभ्यां जननमरणरहितोऽन्नमयादिभ्यो विलक्षणः सर्वैरनुभूयमान उपद्रष्टानुमन्ता च भत्ता ? भोक्ता महेश्वरः परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः इत्युक्त्वा परः प्रमाताविनाशीति सिद्धम् ।

न हि देहक्षयात् प्रमातरि काचिद्धानिः घटध्वंसान्नभसीव यथा घटेष्वबाह्याभ्यन्तरवस्थिताकाशः उपाधिस्थऽन्यः p. 2 तथा प्रमाता च शरीरेषु तदुपाधिरहितोऽक्षयस्वभावः सर्वानुप्राणकः सर्वस्य प्रकाशकः यतः ॥

संविन्मार्ताण्डः सर्वालोकः ॥

शवावभासानां पिण्डानामनुप्राणकः संविन्मार्ताण्डो निजप्रकाशनशक्त्या सर्वं भावजातं प्रकाशयति नहि परमार्थसंवित्प्रकाशानुप्रवेशं विना कस्यचिदपि स्वात्मतोपपद्यते यत्र यदिदं किञ्चिद् बाह्यमाभ्यन्तरं वा प्रतिभासते तत् तदेव तत्प्रकाशकचनम् ।
यदुक्तं महागुरुभिः

महागुहान्तरनिर्मग्नभावजातप्रकाशकः ।
ज्ञानशक्तिप्रदीपेन यः सदा तंस्तुसः शिवम् ॥

इति कथमित्थं ॥

विश्वात्मा ॥

या सा सवितुर्भानशक्तिः सर्वं प्रतिबिम्बितं भावजातं स्वसंविद्शक्त्यान्तरे p. 3 भासयति सा च सर्वपदार्थेषु प्रतिबिम्बति । एकापि नानारूपैव भासते यथाकाशो घटेषु अथवा सूर्यप्रकाशो विचित्ररूपः स्वच्छास्वच्छेषु इत्यतिदुर्घटसामर्थ्यरूपा भगवच्छक्तिः यदि प्रत्यगात्मा

यैव चिद्गगनाभोगभूषणे व्योम्नि भास्करे ।
धराविवरकोशस्थे सैव चित्कीटकोदरा ॥

इत्युक्त्यैकरूप एव तर्हि कस्मात् पश्वादिभ्यो मनुष्याणां परमेश्वर तादात्म्यापादने विशेष इत्याशङ्क्याह ॥

आद्यन्तप्रत्याहारोपदेशात् ॥

भूम्यन्तं सङ्कोचं जडाभिप्रायं पाषाणादिमनुजान्तं विकासतारतम्यात् स्वभावभेदं सर्वेषां हयादिसिद्धो महेश्वरः जाड्यतानवस्वरूपेऽन्तर्भूतो नृदेहोत एवादिदेवस्य 4 प्रकाशद्योतनभाजनं भ्रमरकीटवन्मानुष्यं बिन्दुपर्यवसायात्मकं अकारहकारसम्पुटीकरणमेव रहस्योपदेशं यद्वत् । अन्यश्च ॥

शुद्ध्यशुद्ध्याभ्यां नरेशत्वम् ॥

प्रकृतिपुरुषसंयोगादङ्कुरायमाणमुच्छूनस्वभावं सत्वप्रधानं दृक्क्रियाद्योतनस्थानं तत् स्वाभाव्यात्मकमन्तर्बहिष्करणादिप्राप्तसत्ताकं तदभिमतो संविदात्मकस्वात्मप्रत्यवमर्शोन्मग्ननिमग्नस्वरूपत्वाच्छुद्धाशुद्धविशेषविशेषितावेशनरौ यदुक्तं मायाबिम्बो वशीकृत्य तां स्यात् सर्वज्ञ ईश्वरः अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधेति ।

ईश्वरस्य दृक्क्रियोल्लासं युगपत्समानवृत्या भवति । नरस्य तु तद् विपर्ययात् । प्रत्यभिज्ञयामपि

स्वातन्त्र्यहानिर्बोधस्य p. 5 स्वातन्त्र्यस्याप्यबोधता ।

द्विधाणवं मलमिदं स्वस्वरूपापहानितः ॥

इति नरशब्देन मनुष्यजातिविशिष्टमेव न पशुवनादयस्तेषां तु तत् स्वाभाव्यं रजस्तमस्तारतम्यस्य वैचित्र्यप्रजनं यदुक्तं सर्वद्वारेषु येशैक ? देहेऽस्मिन् प्रकाश उपजायते ।

ज्ञानं यदा तदा विद्याविवृद्धे सत्वमित्युत । >>>
लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ॥
रजस्येतानि जयन्ते विवृद्धे कुरुनन्दन ।
अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ॥
तमस्येतानि जायन्ते विवृद्धे भरतर्षभेति

ईश्वरो हि सर्वज्ञादिगुणशाली सर्वैश्वर्यसम्पन्न एष एवान्तर्यामी सर्वानुप्राणकः । सर्वस्य वेदकः सर्वैरविषयीकृतस्वरूपत्वात् >>>> सर्वत्र साक्षी स्वाङ्गरूपेषु 6 भावेषु पत्योर्ज्ञानं क्रिया च या माया तृतीये ते एव पशोः सत्वं रजस्तम इति स्थित्या जीवो हि सङ्कुचितैरेतैरुणैः पूर्णोऽपि अपूर्ण इव भाति स्वस्वरूपप्रत्यभिज्ञानात् सर्वज्ञादिगुणसम्पन्नस्तद्रूप एव । तदाहुः ॥

प्रवेशात् तन्मयः ॥

स्वस्वभावोन्मग्नस्वरूपात् तुर्यधामानुप्रवेशात् त्राससमये हृत्प्रवेशवत् सर्वतो निवर्तनात् समुच्छलितशक्तिर्दक्क्रियासम्पद्विलासात् सङ्कोचदारिद्र्यं निरस्य स्वचैतन्यात्मसाम्राज्यमवाप्यते । यथा कीटः स्वान्तरसङ्कुचितान् षट्पदगुणान् सर्वतो निवर्तनस्वरूपेण तद्ध्यानप्रवेशेन विकासयित्वा तद्रूपो भवति तद्वज्जीवोऽपि स्वतादात्म्यसमर्पणस्वरूपेण शिवोऽहमिति 7 भावनाबलेन विकसितस्वशक्तिविभवः प्राप्तपरमेश्वरेकात्म्यभावः यदा तु मध्यधामानुप्रवेशात् तन्मय एव तिष्ठति तदा देहस्थोऽपि विभागश्थ?न्यमुपाधिरहितं >>>> चिदाकाशस्वरूपमेवावतिष्ठते सत्यं तत् स्वभावं शुद्धाशुद्धविशेषविशेषितं कथं कुत्रोपलक्ष्यते ॥

सोमसूर्याग्निषु ॥

यथा निरावरणाच्युतस्वरूपो भगवाननामयो देवः प्रकाशानन्दसामरस्यस्वरूपाद् द्वादशकलात्मकमनहतभट्टारकाख्यमवतारं निजशक्तिसमवायिकं भित्तिभूते स्वात्माकाशेऽविष्करोति तथानावृतावृतात्ममष्टिव्यष्ठिस्थित्यवभासनात् >>>>

सोमाग्निसामानाधिकरण्यमध्ये ताभ्यां व्यापकं p. 8 पञ्चशक्त्यात्मकं पञ्चसमवायिनीवृत्यवभासकं द्वादशकलासहितं प्राक्संवित्प्राणे परिणतेत्यादिनीत्या सामान्यविशेषव्यापारात्मकं सहस्ररश्म्यवतारं मूलप्रकृत्याकाशे उद्गमयति एतत् त्रितयधामास्पदे कृतस्थितिः पराशक्तिरिति तदेवाह ॥

तदात्माशक्तिः ॥

एषा तु पराशक्तिः शब्दराशिं क्रोडीकृत्य परपरापरापरसार्धत्रिवलयात्मकुण्डलिनी तां स्वात्मानं नीत्वा ब्रह्मविष्ण्वादिव्यापारेण समस्तं प्रपञ्चं प्रपञ्चयति तत् कौटिल्यात् कुटिलवाहिनी चित्तवृत्तिस्तद्वैवश्येन विस्मृतस्वसंविदात्मनः शुभाशुभवासनात्मकफलभोगभागिनः सर्वे प्राणिनः
खेदमापन्नास्तत्खेदपरिहारयुक्तिमाह p. 9 ॥

सङ्घट्टे स्वचित्प्रमाताचिन्तने परा सिद्धिः ॥ >>>

सोमसूर्याग्निसङ्घट्टं तत्र ध्यायेदनन्यधीरिति ।

मध्यमन्तेन योगेन ऋजुत्वं जायते प्रिये ।

इति नीत्या तस्या ऋजुत्वं सोमसुर्याग्निसङ्घट्टे निजप्रेमातिशयनिर्भरो भूत्वा मध्यमन्तेन युक्त्या सर्वाधीष्ठानं स्वात्मानं परामृष्ट्वा कुटिलाकारन्यग्भावेन ताम् ऋजुत्वं नीत्वा परनादानुप्रवेशात् ऊर्द्ध्वगमनं भावयति ऊर्धगमनात् परसङ्घट्टात्मकमानन्दोल्लासमुल्लासयति यदुक्तं प्रकाशानन्दाभ्यामविदितचंरी मध्यपदवीं >>> प्रविश्यैतद् द्वन्द्वं रविशशिसमाख्यं कवलयन् ।

प्रविश्योर्ध्वं नादं लयदहनभस्मीकृतकुलः p. 10 प्रमादात् तेजन्तः शिवमकुलमस्वप्रविशतीति >>>> यैव सोमसूर्याग्निसङ्घट्टं यथेष्टं सम्पाद्य ईश्वरवन्महावीर्यात्मिका तिष्ठति सैव ताभिः शक्तिभिः स्थूलसूक्ष्मप्रभृतिसृष्टिस्थितिसंहारान् सामान्यदृग्गोचरं कर्तुं क्षमा यथा सोमस्य सितासितपक्षे तद्वत् । यस्तु तत्संघट्टे औदासीन्येन सत्यं ज्ञानं स्वात्मानं परामृश्य सङ्कल्पसृष्टिवत् सृष्ट्यादिकं कृत्वा सोऽपि परमे पदे समाविशति संवित्प्रकाशानुसन्धानात् ।
सर्वाः क्रियाः परधामसमावेशोपायास्तदृते >>>> स्वप्नमुञ्चान्ता एव एवं स अवस्थात्रयं शक्तित्रयं पुटत्रयं प्राणापानसमानदशांशतुरीयप्रकाशोत्तेजनाद्
परामृष्टव्यं p. 11 इत्थं निर्दिष्ट्वा परतत्वप्रवेशायोपायान्तरमाह ॥

सङ्कोचविकासाभ्याम् ॥

स्वसंविन्निभालनबलादन्तर्बहिष्करणवृत्तिनां युगपत् प्रसरविश्वान्तिं कुर्वन् स्वात्मसामर्थ्योत्तेजनेन स्वशक्तिचक्रेशित्वमवश्यं प्राप्यते ।

कश्चिद्धीरः प्रत्यगात्मानमेक्षद् व्यावृत्तचक्षुरमृतत्वमश्नन्निति श्रुत्यान्तर्बहिष्करणवृत्तीनां कुर्माङ्गसङ्कोचवद् युगपत् सर्वतो निवर्तनम् । यदुक्तं गीतासु

यदा संहरते चायं कुर्माङ्गनीव सर्वशः । इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्टिता ॥ इति

प्रसरावसरेऽपि स्वसामर्थ्यबलात् तासां स्वस्वविषये निवेशनम् । यदुक्तं

सर्वाः शक्तीश्चेतनादर्चनाद् याः स्वे स्वे वेद्ये योगपत्येन विश्वक् ।
p. 12 क्षिप्त्वा मध्ये हाटकस्तम्भभूतस्तिष्ठन् विश्वाकार एकोऽवभासीति ॥

प्रकारान्तरमाह ॥

महार्थसन्धानम् ॥

सर्वार्थेभ्यो व्यापकोत्कृष्टपरमार्थसंवित्स्वभावस्यानुसन्धानम *? प्रत्यवमर्शात्मसंवेदनं सर्वासु शब्दार्थचिन्तासु
सदावहितत्वेन कर्तव्यं । तत्परिशीलनप्रकर्षान्निमेषक्षोभोपशमाय शङ्ककलङ्कं विलाप्य परधामनि स चाविषेत् । मन्दाभ्यामादप्राप्त >>> तत्पदस्य सर्वे विघ्नाः प्रवर्तन्ते तस्मादप्रतिहतप्रयत्नेन निश्चलचित्तो भूत्वा परमपदविश्रान्तिमधितिष्ठेत् । अन्यश्च ॥

सत्तासंभवोद्यमो योगः ॥

भावाभावेऽमर्त्याभासमाने सत्तासंभवरूपतास्थापनस्वरूपः p. 13 शक्त्युद्यमः अच्युतस्वभावः परतत्वसमावेशोपायः तदैक्यात्मदृढभावेन यः स्वात्मन्यच्युतस्वरूपे स्वभावस्थितिं करोति लयोदयतीस्व >>> क्षणे क्षणेऽवस्थाविशेषेषु स्वरूपान्न च्यवति स्वास्थ्येन हयुद्यमः प्रकर्षते स्वास्थ्योपयोग्यानि व्यापाराणि युक्त्या निरूप्यन्ते ॥

स्वस्थः ॥

आधिव्यापाराणि सङ्गस्मरणजातानि सूक्ष्मरोगानि तेषां चिकित्सा कर्मणि यो निपुणः स एव स्वस्थः यथा हि ध्यायतो विषयान् पुंस इत्यनेन बुद्धिनाशात् प्रणश्यतीति
कामक्रोधादिदोषा सङ्गादेव जायन्ते अत एवासंसक्तभावनया तान् सर्वानुपशमयेत् । यदि प्रसवादुत्पद्यन्ते तेषां प्रतियोगिनो वैराग्यादयस्तत्महायमन्वेष्टव्यः >>> रहस्यदृशा एक p. 14 एव मोहो महान् रोगः तद्वैवश्येन तु पञ्चमहाभूतावेशः तस्मात् सर्वाणि भूतसञ्ज्ञकानि भ्रान्त्योन्मत्तवच्चरन्ति तत्प्रशमनार्थं स्वस्मिन्नेव प्रकाशानन्दपदे नायासेन तिष्ठतीति स्वस्थः सदावहितस्य हि दासवद् वैराग्यादयोऽनुचरन्ति ननु पञ्चशक्त्यात्मके चित्ते बलवत् तद्वृत्त्युन्मुखे क्रोधादयो वश्यं प्रवर्तन्ते केन युक्तिसामर्थ्येन तापं शमयतीत्येतदेवाह ॥

वितर्कः परमौषधम् ॥

विवेको हि तुष्टिपुष्टिहेतुभूतत्वात् सर्वायासनिरासकरं परमौषधं । तत्प्रसादेन स्वात्मसङ्कोचात्मकं दौर्बल्यं विहाय परमवीरत्वं संप्राप्य योगिनः सम्राज इव विराजन्ते । तथा च नेति p. 15 नेतीति युक्त्या सदसद्विवेचनं कृत्वा धर्मप्रतिद्वन्द्वीन्यादौ शमयित्वा सर्वाणि करणानि निजसंवित्प्रसादेन प्रसन्नतां नीत्वा क्षुब्धत्वं ततो गुणानां सामान्याधिकरण्यं द्विविधं गुणवृत्तिप्रवृत्तिनिवृत्त्यौढासीन्यं परिणमते । रुचिश्च शुद्धामयत्वेन त्रिधा तद्व्यापारस्य पूषे सात्विकी राजसी तामसीति संज्ञा कृता ।
साप्युन्मीलननिमीलनार्धनिमेलनभेदान्नवधे दृशा विभागेन क कस्याः प्राधान्याद् p. 16 ।

बुद्ध्यादिवृत्तिसम्बन्धत्वाच्चानन्तप्रकारा एते हि गुणा यत् सहायत्वेन
प्राप्तसत्ताकास्तन्मध्यबलमाश्रित्याहंप्रत्ययः सर्वात्मस्वसंविदात्मनि समाविष्ठो भूत्वा यथेष्टं वेद्यवेदकाभासं स्वेच्छया वै भासयिष्यति । किं च परिपूर्णस्वतन्त्रानन्दसुरूपो विश्वनिर्भरवपुरखण्डात्मा शिवोऽहमस्मीति यो विचारः स एव परमौषधं सङ्कुचितैश्वर्यस्य मलत्रयाभिभूतस्य जीवस्य जन्ममरणादिव्याधिं निरस्य परमशिवाख्यममृतधामस्वात्मात्मन्येवावस्थितिं प्रकटीकरोति ॥

उदितबलो हि योगी ॥ सोत्कट्वादिहामुत्रसाक्षी ॥

p. 17 या वृत्तिभित्तिभूतान् निजस्वरूपादुन्मीलयति ताः स्वात्मनि हेलया निमीलयति । यत् तदेव स्वात्मनो बलं तस्योत्कर्षादुन्मग्नस्वभावाद् इहामुत्रसाक्षी । यथा स्वप्नजागरौ नन्धिहोपयुक्ता >>>> स्ववृत्तिषु प्रमातरि साक्षित्वमवश्यमेवाङ्गीकर्तव्यं कथममुत्रेत्याशङ्क्याह ॥

हृदयं प्रकाशः ॥

यतः सर्वासां दृश्या दृश्यवृत्तीनां प्रसरविश्रान्तिस्थानं चित्प्रकाशस्ततो योग्यपि तत्प्रकाशप्रकाशनात् स्वसंविन्मकुरान्तरे प्रतिबिम्बितानिहामुत्रगतान् भावजातान् प्रकाशयित्वा तद्व्यापारसाक्षी । यदुक्तं वासिष्ठे

स्वज्ञानदर्पणे स्फारे समस्तावस्तजातयः
इमास्ताः प्रतिबिम्बन्ति सरसीव लटद्रुमाः ॥

इति p. 18 ईदृश्यामवस्थायां बाह्याभ्यन्तरवृत्त्युपसंहरणात् ॥

प्रमादे न्यक्कारः ॥

प्रमादे महामयारूपे मितसिद्धिप्रपञ्चे स्वातन्त्र्यरहिते स्थगितस्वभावे च निजौदार्योच्छलनबलान्न्यक्कारः हेयमिति विचारः । यदा तूल्लसितमपि सिद्धिप्रपञ्चं इन्द्रजालमिवैन्द्रजालिक इव पश्यति । तदा तत्सृष्टिलयात् परतत्त्वारूढो भवति नन्वीदृशे सिद्धिप्रपञ्चे कथं न्यग्भावं कर्तुं शक्नुयादित्याह ॥

त्वप्तः ? ॥

यदैश्वर्यविप्रुड्भिर्ब्रह्मादय ऐश्वर्यभागिनस्तस्यात्मनो लाभेन स्वस्वभावैक्यात्मोल्लासेन परिपूरिताभिलाषः स जीवः सर्वाकाङ्क्षोन्मूलने क्षमः । तदेव स्फुटयति ॥

p. 19 परापराकलङ्किता पराकाष्ठा ॥

विक्षेपाश्रयपदार्थरञ्जने ऐकाग्र्यभावनया निजपिण्डबालाग्रचेष्टापरिचिन्तने >>>> च प्रकृताश्रितं ज्ञानं तदुत्तीर्णोच्छलनस्वभावा पराकाष्ठा तस्यामधिरूढे स्थूलसूक्ष्मवाक्याभ्यन्तरैहामुत्रिकविषयवासनाविनिर्मुक्तः परमहंसस्तस्य स्थितिमाह ॥

पद्मासनस्थः परमहंसः ॥

एकाधारत्वाद् युगपत्सङ्कोचविकासधर्मित्वाच्छक्तिचक्रमेव पद्मम् । तस्मिन्नेव सृष्टिस्थितिसंहारपिधानानुग्रहकारकः परमहंसः प्रभुत्वेन स्थित्वा निजशक्तिमुखेन यदोत्तीर्णं महारावं गीयते । तत्समाश्रिता ब्रह्मादयो देवा हृष्यन्ति जीवन्ति च इति शक्तिचक्रमेव p. 20 तस्य शरीरम् । एतादृशस्य

परमहंसाश्रमस्थस्य स्वरूपमाह ॥

निराभासत्वम् ॥

सोमसूर्याग्न्युद्भासितं बाह्याभ्यन्तरं यत् किञ्चिद् भासते तत्सर्वं धीगोचरं ।

न तत्र सूर्यो भाति न चन्द्रतारका नेमा विद्युतो भाति कुतोऽयमग्निः तमेव भान्तमनुभाति सर्वं तस्य भासः सर्वमिदं विभाति ।

न तद् भासयते सूर्यो न शशङ्को न पावकः ।
यद् गत्वा न निवर्तन्ते तद्धामपरमं मम ॥

इति स्थित्या तदतिक्रम्य समस्तशङ्क्यैकसङ्घट्टत्वान् >>> निराभासं स्वप्रभाभास्वरं विश्रान्तिस्थानं तत् स्वतन्त्रात्म भूतस्य सहजं स्वभावं तत्पदाधिरूढस्य वहिनमागमाद्यवसरे लोकान्तनतां >>>> चर्यामाह ॥

p. 21 स्वाच्छन्द्यम् ।

स्वतन्त्रोल्लासितस्वभावे वर्तमानस्य या वृत्तिः सा निर्मलाहमेव परो हंसः शिवः परमकारणमिति स्थित्याहंप्रत्यवमर्शः सर्वत्राप्रतिहतस्वरूपः स एवासौ हानादानमानावमानकल्पनारहितार्जवपुरःसरं व्यवहारं यथेष्टं करोति । यदुक्तं

क्वचिच्छ्रेष्ठः क्वचिद् भ्रष्टः ? क्वचिद् भुतपिशाचवत् ।
नानावेशधरो योगी विचरत्यवनीतले ।

इति एवंदशावृत्त्या वर्तमानस्य स्वभावस्थितिमाह ॥

घूर्णितः ॥

अनुत्तराह्लादरसास्वादक्षीवितोऽन्तर्बहिष्करणचक्रं तत्पूरेण प्लावयित्वार्व निमीलनवृत्या मदिरामदघूर्णित इव सर्वव्यापारसाक्ष्युपलक्ष्यते । यदुक्तं p. 22 वासिष्ठे

अन्तर्मुखतया तिष्ठन् बहिर्वृत्तिपरोऽपि सन् ।
परिश्रान्ततया नित्यं निद्रालुरिव लक्ष्यते ॥

इति ननु परमे पदे बाह्याभ्यन्तरवृत्त्युपशमे सहजानन्दचमत्कार उल्लासति । किन्तु तत्प्रसरे प्रारब्धभोगमवश्यमश्नुते । कथं तादृक्स्वभावतत्त्वसङ्गिना कर्तव्यमित्याशङ्क्याह ॥

अमा पूर्णा च ॥

या चैषामृताकाररूपा शक्तिर्बाह्योल्लासरूपात् परप्रमातृविश्रान्त्यन्तं देवपितॄन् तर्पयित्वा विस्मयरूपामावशिष्यते । सैव परप्रमतृपदाद् बाह्योल्लासपर्यन्तमनपह्नवनीयस्वभावा सदोदिता सर्वान् पाययति पोषयति च तच्छक्तिमांश्चण्डभास्कर इव सर्वो ममायं विभव इत्येवं साक्षात्कृतः सुस्वभावो योगीश्वरो विराजते ।
p. 23 नास्य स्वस्वरूपप्रकाशनव्यतिरिक्तं किञ्चित् । ईदृशस्य योगिनो माहात्म्यमाह ॥

योगीन्द्रो भैरवः ॥

सर्वप्राणनरूपा क्रियाख्यानुत्तरादिदेवस्य शक्तिः कालेन परिणता प्रकृत्युल्लासरूपाणि विकारवैचित्र्याणि स्वस्मिन् प्रोतानि प्रेरयति । कालो हि अध्यात्मिकबाह्यस्वरूपत्वाद् द्विधा दक्षिणोत्तरगत्या सप्तर्क्षचक्रं भ्रामयन् । तद्भ्रामणाद् दिनरात्रिह्रासवृद्धिविभागमाभास्यत् तुटिमुहूर्तादिना सर्वं प्रपञ्चं कलयति तदधीना देवादिस्थावरान्ताः सर्वे प्राणिनस्तद्ग्रासकः श्रीमन्महाभैरवदेवो निराभासाभाससम्पद्विलासोद्भवविस्मयचमत्कारस्वतन्त्रो योगीश्वरस्तस्य p. 24 स्वभावो लयोदयाकलङ्कितः सर्वत्र स्वचमत्कारनिर्भर एव यतः स्वात्मैक्यात्मभूतानां भक्तिभाजां हृदये महेश्वरः स्वसामर्थ्यस्वरूपं साक्षात्करोतीति शिवं ॥

इति श्रीमहामाहेश्वराचार्यवर्यविरचितायां स्वातन्त्र्यबोधदीपिकायां परमेश्वरविभूतिस्फारतत्समावेशोपायकथनं नाम प्रथमोल्लासः ॥

.ओ प्रकाशानन्दस्वरूपा महेश्वरस्यैकैव स्वरूपभूता परा शक्तिः । सैव सर्वात्मना स्फुरति एकैवानेकरूपा भासते तदंशा हि सर्वे प्राणिनो ममैवांशो जीवलोके जीवभूतः सनातनः मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षतीति स्थित्या तदंशो जीवस्तद्रूपोऽपि तद्वै मुख्यात् प्राप्तपशुत्वो यत् तस्य निजशक्तिसङ्कोचस्वरूपान्तर्बहिष्करणाधीनस्वभावा बहिर्मुखो ध्यासस्तदेव >>>> पशुत्वमंशत्वं च तस्य

स्वात्मभूतात् परमेश्वराद् विमुखस्य शक्ति दरिद्रस्य स्वशक्ति विकासात्मकं प्रत्यभिज्ञानं प्रतिपादयिषुः प्रथमं तावत् तत् तदनन्तजगदात्मना स्फारितस्वरूपां परमेश्वर हृदयभूतां परां शक्तिं वितत्य निरूप्यते ॥

प्रभुशक्तिः परा काली ॥

सर्वासां शक्तीनां प्रसरविश्रान्तिस्थनभूतः प्रभुर्महेश्वरस्तन्नित्ययोगिनीसारभूता शक्तिपञ्चकप्राणनस्वरूपा परा स्वातन्त्र्यभट्टारिकानुत्तराकुलजम्नोऽहमिति स्पन्दनोल्लासं प्राप्तेच्छाज्ञानक्रियारूपेण p. 26 प्रस्फुरतीदमिति बहिरुल्लिलसिषापेक्षया । ताभिस्तत्स्थितस्वरूपाभिस् तत्रितय >>>> स्तम्भनस्वभावाम् इदन्तात्मिकां मायाभिधां सङ्कोचप्राधान्यात्मसत्त्वरजस्तमःसाम्यावस्थां प्रकृतिमाभास्य शिवशक्त्यात्मिकां बीजयोनित्वमादधात्मैव पुत्र इत्युक्त्या स्वांशभूतो नरेश्वराख्यौ सन्तानौ >> स्वातन्त्रोन्मीलननिमेलनादेकानेकमूर्तीन् सर्जयित्वा प्रकृत्युच्छूनात्मकेषु तत्तत्स्थानविशेषेषु विकसितस्वरश्मिभिर्यथा योग्यं चकास्ति । रश्मयस्त >>> सोमसूर्यवह्न्यात्मिकास्ताभिः प्रसरणस्थापनसंहरणस्वरूपाभिः सर्वमिदन्तात्मकं क्षिपति स्थापयति ग्रसतीति कालीद्वादशात्म p. 27 सर्वेषु भूतेषु समस्तविद्योत्पादिका कलावती कौशल्याद् । व्याप्यव्यापकस्वरूपा तत्र द्वादशान्तपीठे ज्ञाननिधिस्वरूपा हृदिस्थाने जीवनव्यापारा तथा द्वादशान्त इच्छाख्यतन्त्रप्रेरणादैन्मुजालिक >>>> इवान्तर्बहिष्करणादिषु ज्ञानक्रियेषु सङ्क्रामयित्वा तद्व्यापारात्मकम् इन्द्रजालमाविष्करोति । हृदिस्थाने च लोहकार इव प्राणयन्त्रचोदनाद् उदरगतं वैश्वानरं सूद्दीपयित्वा सारासारविभागेनान्नपानं पचति । तदानन्तात्मा >>> रंये हृत्स्थाने नीयते । तत्रापि सारासारं विभज्य निजमरीच्युल्लासरूपया तत्तच्छक्तिस्वरूपया तत्सारं तत्तत्स्थाने यथा योग्यमाकर्षयति । तेन सोमकलां बलवन्तीं कृत्वा सर्वाण्यङ्गानि पुष्णाति p. 28 ।

तत्र हानसमाधानस्तम्भनसाम्यापादनव्यापकाधारभूतस्वरूपाभिः पञ्चशक्तिभिर्विराजमाना सोमाग्निसामान्याधिकरणात्मकं बलमेव जीवनम् ॥

सोमसूर्याग्निमध्ये कृत्वास्पदा *? ष्टत्रिंशत्कलास्वरूपैत्येवं प्रकारा ब्रह्मरन्ध्रादधो वक्त्रपर्यन्तं चितिरेव सर्वत्र गता तद्विमुखः पशुरिति तदेवाह ॥

वैमुख्यात् परवशो जीवः ॥

अहमात्मा गुडाकेशः सर्वभूताशयः स्थित इति नीत्या परासंविदेव सर्वाशयेष्वात्मभूता तद्वैमुख्यात् स्वस्वभावविस्मरणस्वरूपात् सङ्कुचितनिजशक्तिविभवः प्रकृतितादात्म्यमापन्नचिद्रूपः प्राणे परिणमति

प्राणचेतसौ परस्परं संबद्धो p. 29 सर्वेद *? विशेषास्तद्वृत्तिस्वरूपास्ताश्च हृदुदरादिस्थानेषु विकसितप्रायस्तत्तत्स्वभावतुल्यतामादधानजीवो हि गुणानुसारी क्षीराज्यसम्बन्धवत् तत्रावस्थितो तेनैव परवशः । तत्तश्छब्दस्फुरणात्ममातृकाचक्रव्यामोहाद् बाह्योल्लासरञ्जितज्ञाने सिष्याप्रत्ययरूपाध्यामाभिभूतः >>>>> कामक्रोधलोभमदमात्सर्यशोकहर्षादिभिरभिभूयमानो जननमरणव्याधिभिः परिभूयते । यदुक्तं

सत्वस्थो राजसस्थश्च तमस्थो गुणवेदकः ।
एवं पर्यटते देही स्थानात् स्थानान्तरं व्रजेत् ॥ इति

करन्ध्रचितिमध्यस्था ब्रह्मपाशावलम्बिकाः ।
पीठेश्वर्यो महाघोरा मोहयन्ति मुहुर्मुहुः ॥ इति

पुर्यष्टकेन संरुद्धस्तदुक्तं p. 30 प्रत्ययोद्भवमिति च ।

ईदृशामवस्थां प्राप्तस्य भ्रमनिवृत्तिस्वरूपं क्लेशनिर्हरणोपायमाह ॥

देहास्थैर्यदर्शनम् ॥

शुक्रशोणितपरिकल्पितस्य षड्विकारसहितस्य दशदोषदूषितस्य देहस्यास्थैर्यदर्शनम् । नदीवेगोऽर्थ >>> बुदबुधवद् विमर्शनं कर्तव्यम् । सुखदुःखानां भोगायतनमिदं शरीरवराकं क्षणभङ्गुरमेवेति दृष्ट्या तत्सम्बन्धीनि कुटुम्भादीनि तदग्रे गतान्येवेत्युपलक्षितानि इति तीव्रतमवैराग्यभावनादाढ्यमापन्नस्य सत्यज्ञानानन्दस्वरूपस्वात्मस्थितिहेतुमाह ॥

उत्तमसङ्गः ॥

तद्विज्ञनार्थं गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति श्रुत्या विगलितरागद्वेषाणां विकसितपरबोधात्मकानां p. 31 समीपे गत्वा सेवाप्रणामादि पुरःसरीभावेन तद्भाषितानि वधांसि >>> हृदयकर्णैराकर्णयित्वा तदनुवर्तनीयम् । तदाज्ञापालनमेव परं पुण्यं तद्विहीनमेव >> महापातकम् । परतत्त्वारूढानां साधूनां सङ्गमो हि परपदप्राप्तये उपयुक्तं न तु सद्बोधरहितानां दाम्भिकानां यतः सङ्गानुरूपः स्वभावः प्रवर्तते ततो युक्तमुक्तमुत्तमसङ्ग इत्यनुत्तरपदविश्रान्तिभाजो ये पवित्रीकृतहृदयाः सर्वोत्कृष्टास्ते सत्सम्प्रदायोपदेशयुक्त्या तारणे क्षमाः दर्शनात् स्पर्शनाद् वापि वितताद् भवसागरात्

तारयिष्यन्ति योगीन्द्राः कुलाचारप्रतिष्ठिता इति ह्युक्तम् । स्वभावस्थितिपोषिकां p. 32 तदधिगतां युक्तिं स्फुटयति ॥

मध्यचिन्तनात्मिका युक्तिः ॥

सङ्कोचप्रसरस्तम्भनात्मकेषु प्राणान्तर्बहिष्करणादिवृत्तिषु मध्यचिन्तनात्मिका संविदुच्छलनस्वभावा या युक्तिः सा सर्वाधिषुनात्मके >>> परासंवित्स्वरूपे स्वात्मपरिज्ञाने कारणम् । यथा काष्ठनिर्मथनादग्निः क्षीरमन्थनात् सर्पिर्विलक्षणः प्रादुर्भवति तथा मध्यचिन्तनयुक्तेः स्वात्मसाक्षात्कारो भवेदिति भवः । ननु स्वरूपस्थितिप्रतिबन्धकानि बहूनि विघ्नानि सन्ति कथं तान्युपशमयेदित्याह ॥

अभ्यासप्रकर्षाद् विघ्ननिरासः ॥

मध्यभावनापरिशीलनप्रकर्षादितस्ततश्चेतसोवृत्तिनियमात् क्षणे मध्यचिन्तनाविस्मरणात् सर्वेषां p. 33 साधिध्याध्यादीनां स्थूलसूक्ष्माणां क्षोभानां निरास उपशमः । उपशमितक्षोभस्य

चित्तैकाग्र्यादात्मबोधः ॥

लयविक्षेपालस्याद्यतीतात्
तत्तत्क्षुद्रसिद्धिप्रपञ्चोल्लासन्यक्कारस्वरूपाश्चित्तैकाग्र्यान्निरन्तरनिर्विकल्पनादबिन्दुस्थैर्यस्वभावात्मन्तोषादिसम्पन्नस्य श्रद्धाभक्तिमतो हृदये आत्मबोधः स्वस्वरूपविकासात्मा सत्वापत्तिर्भवति । आत्मव्याप्तिर्भवत्येषा इत्युक्तेऽयमेवात्मव्याप्तिलक्षणा चतुर्थी भूमिका शिवव्याप्तिरतोऽन्यथा इति नीत्या यदा तु शिवव्याप्तिमिच्छति तदा

रसनिर्भरम् ॥

श्रद्धाभक्त्यतिशयदार्ढ्याच्छैवधर्म्यं जिगमिषुस्तद्रसेन तदैक्यप्रत्यवमर्शात्मकमीतलाच्छास्वादरसेन >>>> p. 34 मीन इव परिपूरितवपुर्यथा जलमयत्वेन नायासं मत्स्यव्यापारं तथा योगिनामेव बुद्धिमनःप्राणेन्द्रियव्यापारं परप्रतिभोन्मज्जनात्मकम् । ईदृशस्य योगयुक्तस्य

तदनुरूपौ >>> व्रततपसौ ॥

परप्रतिभोन्मज्जनप्रकर्षात् सर्वैश्वर्यसम्पन्नोऽन्तर्बहिर्व्यापकः परमेश्वरोऽहमेवेति नियमेन

महाभिमानभाजनात्मकं यद् व्रतं तदेव निःशेषमलच्छेदनस्वरूपं तपः ईदृग्व्रततपोभजमानस्य प्रभुशक्त्युज्जृम्भनात्मिका प्रसन्नता सर्वत्राविर्भवति । अस्य च

अविभागानुपा?यनो जपः ॥

उपसंहृतान्तर्बहिःसञ्जल्पप्रसरान्निर्विकल्पस्वरूपोऽप्रतिहतस्वभावः पश्यन्ती वाक्प्रधानः परमस्पन्दः शिवोऽहं स्फुरणात्मको जपो जायते p. 35 । यदा तु त्रिपुटीभेदोपशमनात्मको जपोश्चधो ? >>>> हृद्युल्लसति तदा

विशेषार्पणात् परमो लाभः ॥

प्राणपुर्यष्टकमायाप्रमातृत्वान्तर्बहिर्विकल्पानुसन्धान भेदाभेदोपशमनस्वरूपान्निवेषार्पणात् परमस्य प्रकाशानन्दघनस्य परमेश्वरस्य लाभः साक्षात्कारः यदुक्तं मानसं चेतनाशक्तिरात्मा चेति चतुष्टयम् ।

यदा प्रिये परिक्षीणं तदा तद्भैरवं वपुरित्यादि इयमेव
निःशेषार्पणरूपपूर्णाहुतिरनयानेकजन्मार्जितशुभाशुभवासनप्लोषकः सुषुम्णागर्ते तदा वह्निरुद्बुध्यते । तन्मुखेन चैतन्यदेवः सन्तृप्यति सन्तोष्य च भक्तिभाजां हि महाव्योमाकारां परमसिद्धिं ददाति तदाह ॥

तदनोदयात् पराप्रसादः ॥ p. 36

यतः साम्यापादनसामर्थ्यं सर्वत्र यथा योग्यमुदानस्य लक्षणं तस्मादुदितमध्यबलस्वरूपात् तद्वृत्त्योदयाश्चैतन्यधामात्मकस्य परमेश्वरस्य शक्तिपातस्तदात्मतावेशः ।

उदानो हि महानग्निरिति

यथाग्नावर्पितानि द्रव्यविशेषाणि अग्निसाद्भवन्ति तथा उदानवृत्युदयात् प्राणान्तःकरणादीनि स्वतादात्म्यसमर्पणेन सत्यज्ञानैकात्म्यभूतान्येव भवन्ति । उदानस्य प्राणीयभावनिमज्जनेन ज्ञानशक्तिरूपत्वमिति ह्युक्तम् । या सा शक्तिः घ्राणाद्यनुसरणाज्जाग्रदादि पदेषु परतन्त्री भूता जीवसंविदभिधाना सैव मध्यधामात्मनि निजबलासादननिमित्तादुदानोपायात् परमार्थसंवित्स्वरूपा तुर्या सर्वं भेदाभेदात्मकमिदं p. 37 विश्वं स्वात्मनि विलाप्य तुर्यातीतपदविश्रान्तिभागिनी । यदुक्तं

जगत्काये कृत्वा तदपि हृदये

तच्च पुरुषे पुमांशं बिन्दुस्थं ।
तदपि वियदाख्ये च गहने
तदेतज्ज्ञानाख्ये तदपि पर
मानन्दविभवे महाव्योमाकारे >>>>>
त्वदनुभवशीले विजयते

इति विश्रान्तिलक्षणान्येवाह ॥

रोमञ्चाद्याः समाधिचिह्नाः ॥

भ्रमः कम्पश्च घूर्णिश्च प्लुत आनन्द एव चेत्येतानि लक्षणानि क्रमात् क्रममुल्लाङ्घ्य आनन्दप्रकर्षादसुरोमाञ्चौ बाह्यलक्षणौ समाधेः तत् प्रादुर्भावेसु सितसमस्तवृत्त्यात्मिका प्रकाशानन्दस्वरूपा समाधिरुच्यते । इत्थमस्य स्वरूपमाह ॥

समावेशात् पतिसमः ॥

p. 38 सुसंविदात्मनिभालनयुक्त्योदितोदानीयवृत्तिस्तद्दार्ढ्यात् प्राप्ततुर्यैकात्म्यभावः तदैकात्म्येन जाग्रदादिपदेषून्मीलितस्वस्वातन्त्र्यो गलितप्राणादिवृत्तिः परमशिवधाम्नि समाविष्ठो भवति । तदावेशेन सर्वास्ववस्थासु सम्राडिव विराजते जीयन्नेव शिवसायुज्यमश्नुते । यदुक्तं

अहो संसारस्वखकेली अहो स्वलभं मोक्षयाने सौभाग्यम् । त्रुटितान्तककलिका अहो शिवयोगिनां यामलीवृत्तिरिति शिवम् ॥

इति श्रीमहामाहेश्वराचार्यवर्यविरचितायां स्वातन्त्र्यदीपिकायां परशक्तिसमावेशो नाम द्वितीयोल्लासः ॥

.ओ यथा पराद्वयसामरस्यस्वरूपो महेश्वरः स्वशक्तिबलात् सर्वमिदन्तात्मकं भित्तिभूते स्वात्माकाशे हेलयैव प्रकाशयित्वा निमिलयित्वाद् प्रकाशानन्दात्मके स्वस्वभावे स्वतन्त्रस्तथा तदैक्यमापन्नस्तत्सुरूपभूतो जीवन्मुक्तोऽसंसारान्मोक्षान्ते रमति । तदेव प्रकाशनमारभमाणो शिवशक्तितारत्यस्वरूपाटयोः >>> सामरस्यस्वभावां तेषां हृदये विकसितां विमर्शशक्तिं तावत् प्रकटीकरोति

॥

प्रकाशमानो महाप्रकाशः ॥

अनुत्तरानन्दस्वरूपो महाप्रकाशात्माचैतन्यदेवो निजप्रकाशनशक्त्या प्रकाशमानः प्रकाशनं हि सत्तास्फुरत्तात्मकं तत्प्रकाशेन तेजस्तमसोपलक्षितानि बाह्याभ्यन्तरगतानि नीलसुखादीनि प्रतिभासन्ते । सूर्यादीनां प्रकाशो p. 40 यद्यपि प्रकाशमानो न हि स्वस्वरूपप्रतिपादने समर्थः । अतो हेतोर्नीलादिप्रकाशवज्जडाभिप्रायः चित्प्रकाशेन प्राप्तसत्ताकः ? स च स्वप्रकाशः । ननु महाप्रकाशस्य स्वप्रकाशत्वं कुतोऽङ्गीकर्तव्यमिति तदाह ॥

विमर्शवत्त्वात् ॥

संवित्प्रकाशाधीनाः सर्वे प्रकाशास्तत्प्रकाशनेन तेजांसि च तमांसि च भासन्ते संवित्प्रकाशो हि विमर्शवत्त्वात् स्वप्रकाशः विमर्शो नामाहमिति स्वरूपः यदुक्तं प्रकाशमानं न पृथक् प्रकाशाद् विमर्शात्म च विमर्शो न पृथक् प्रकाशात् । नान्यो विमर्शो sहमिति स्वरूपादहं विमर्शो sस्मि चिदेकरूप इति विमर्शादेव सर्वमुत्पन्नं प्राप्तसद्भावं विमर्शो हि सर्वस्य स्वात्मभूताकृत्रिमः p. 41 स्वभावः तथा च प्रत्यभिज्ञायां

स्वभावमवभासस्य विमर्शं विदुरन्यथा ।
प्रकाशोऽर्थोपरक्तोऽपि स्फाटिकादिजडोपमः ॥

इति स्थित्या विमर्श एव परमेशितुर्मुख्यं स्वरूपं तन्मुखेनात्मना स्वात्मभूतं प्रभुं परिज्ञेय । यदुक्तं

तस्य देवातिदेवस्य परबोधस्वरूपिणः ।
विमर्शः परमाशक्तिः सर्वज्ञज्ञानशालिनीति

सा शक्तिर्गीयते ॥

अनन्तोल्लासरूपा ॥

अहं प्रत्ययस्वरूपा परावाग्विमर्शिनीशक्तिः पश्यन्तीमध्यमावैखरीस्वरूपेण प्रस्फुरन्तीच्छाज्ञानक्रियात्मना विराजमाना तत्रैकैकस्यास्त्रैरूप्याद् नवधा स्वमरीच्युल्लासात्मिकां वर्णसृष्टिं तदात्मिकां p. 42 पदमन्त्रस्वरूपतां च भासयित्वाकारहकारप्रत्याहारेण नादबिन्द्वाविभागात्मस्वभावा दशमीवीर्यभूता इयमेव

चित्तत्त्वं प्रकर्षेण विराजमाना इति यदुक्तं

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते ॥
वाग्रूपताचेदुत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनीति ॥

किं च ॥

द्वादशात्माहंसी च ॥

चितिरेव भगवती परस्पन्दनात्मकतयोन्मनाभिधाना

कामयत प्रजा सृजेयतेति श्रुत्या किञ्चित्सङ्कल्पात्मकं समनाभावमासाष्य >>>>व्यापिन्याद्यकारपर्यन्तं स्थूलात्म सूक्ष्मं प्राणस्वरूपेणावतरति यदुक्तं ।

कलैकादशिका चैव प्राणे चरति नित्यशः ।
p. 43 अकारश्च उकारश्च मकारो बिन्दुरेव च ।
अर्धचन्द्रो निरोधी च नादो नादान्त एव च ।
शक्तिश्च व्यापिनी चैव समनैकादशी स्मृता ।

उन्मना तु ? ततोऽतीता तदतीतमनामयमिति चाकारादिनिरोधिन्यन्तं पञ्चमात्रा नादादिव्यापिन्यन्तं पञ्चमात्रांशाः बौह्योल्लिलसिषात्मसङ्कल्परूपा समना तासामधिष्ठानभूता प्राणनस्वरूपा परस्पन्दनात्मोन्मना सैव परमेश्वरहंसस्य मुख्या शक्तिः स्वमरीच्युल्लासात्मके र्थर्वाधो? मुखे >>> कमलयुगलमध्ये स्वस्वामिप्रेमातिशयनिर्भरा स्थिता निजविभूतिचमत्कारचमत्कृतिहेतवे द्वादशमहावाक्यैर्द्वादशकलात्मकं महारावं गीयते एवं ह्यसौ ॥

p. 44 तदारूढोऽप्रतिहतस्वभावः ॥

यथा परमेश्वरः स्वस्वातन्त्र्यात् सर्वत्राप्रतिहतस्वभावः तथा तदैक्यमापन्नोऽपि बुद्ध्यादिव्यापारेष्वविस्मृतस्वात्मसम्पद्विलासः देहाभिमानपाशनिकृन्तनात् सच्चिदानन्दात्मकः अहं ब्रह्मास्मीत्यभिमाननरूपो नित्योदितात्मभावः ईदृक्स्वभावतः सत्यधामावेशात् सर्वामृतं परासंविदेव

सत्तास्फुरत्तात्मासत्यधामतदावेशाद्धेतोः सर्वं कायवाङ्मनसगोचरामृतं नित्यव्यापकपूर्णस्वरूपस्य परमेशितुर्विजृम्भनम् । ध्वन्यार्जवभूतस्य कालत्रितयात्मिकां कायवाङ्मनोभिर्यद्यश्चेष्ठां प्रवर्तते तत् तदेवाग्रे स्फुटीभवति ।
अपि चासौ

p. 45 उदितौदार्यः ॥

योगी ह्युदितौदार्यः उन्मग्नस्वसंविदौदार्यस्वभावः देहीन्द्रियादिव्यापाराख्ये मायाप्रपञ्चे पद्म इव सदा शुचिरलेपो न च तद्व्यापारोल्लासरूपास्य वासना कालकलानियतिरागादिभिरभिभूत्वापि >>> शुद्धविद्यामयासत्तासामान्यस्वरूपा तस्मादस्य ज्ञानमन्तःकरणातीतं स्वतःसिद्धं न तु मूढवत् तदधीनम् । उन्मिषितानुत्तरस्वरूपत्वा षट्त्रिंशत्तत्वानि निजौदार्यस्वभावाङ्कितानि स्वशक्तिविभूतिसम्परिपूरितानि भासयति ईदृग् योगी ॥

प्रशान्तमोहः धन्यो रमति ॥

शरीरत्रितयव्यापारमवस्थात्रयं p. 46 तदेव जगन्नामकं लोकत्रयं तच्छायाकलङ्कश्थन्यः ? >>> सर्वमेव स्वशक्तिस्फारात्मकं ज्ञात्वा तस्मिन्नेव तदधिपतिस्थाने परमार्थाच्युतस्वरूपे सर्वैश्वर्यसम्पन्ने स्वात्मनि स्थित्वा धन्यः कृतार्थः स्थितप्रज्ञो रमति क्रीडति जगद्ध्यस्य क्रीडास्थानं । यदुक्तं वासिष्ठे

परिक्षीणे मोहे गलति चपले ज्ञानजलदे परिज्ञाते तत्वे
समधिगत आत्मन्य ऋभमते विचार्यार्यैः सार्वं गलितवपुषोर्वै सदसतोर्धिया दृष्ठैतत्वे रमणमटनं जागतमिदम् ।

प्रसन्ने चित्तत्वे हृदि स्वविभवे
वल्लति परे
समाभोगीभूत्वा
स्वखिलकलनादृष्टिषु पुरः
शमंयन्तीष्वन्तःकरणघटना
विहरामित्यनघया धिया p. 47 दृष्टे तत्त्वे रमणमटनं जागतमिदम् ।

रथस्फारो देहस्तुरगरचना चेन्द्रियगतिः परिस्पन्दो वातादहमकलितानन्तविभवः परो वा वा देही जगति

विहरामित्यनघया धिया दृष्टे तत्वे रमणमटनं जागतमिदम् । >>>>>

इति ईदृक्स्वभावेन सर्वं स्थावरजङ्गमात्मकं भित्तिभूते सर्वाधारे स्वात्मनि तिष्ठतीति ज्ञात्वा रागद्वेषमानावमानादिप्रशमनाद् अस्मिन् जगति जीवन्मुक्ता निर्भया चरन्ति ।

ईदृक्तत्त्वज्ञः

विश्रान्तिपदे चिदाकाशः ॥

प्रकाशस्यात्मविश्रान्तिरहंभावो हि कीर्तितः उक्ता च सैव विश्रान्तिः सर्वापेक्षानिरोधतः इत्यादि स्वस्मिन्नेव स्वात्मभूते p. 48 चित्प्रकाशानन्दघने निस्तरङ्गमहोदधिसदृशे विश्रान्तिस्थाने स्वात्मनाविश्य गलितबन्धमोक्षगमागमादिसमस्तशङ्ककलङ्कश्चिदाकाशोऽवशिष्यते ।

एवं ह्यसौ

अन्ते तन्मयः ॥

यतश्चिदाकाशस्वरूपः परमेश्वरः सर्वाकाशः सर्वाधारो भित्तिभूतस्ततस्तदैक्यमापन्नोऽपि प्रारब्धक्षयावसरे तन्मय एव नह्ययस्य संवित् प्राग्वदिन्द्रियादिपदेषु प्रसरति । अपि तु निर्विभागचिदाकाशे घटध्वंसे नभसीवतिष्ठते । एतदेव मोक्षः न तु कुत्रचिद् गमनं । श्रुतिरपि >>> न तस्य प्राणा उत्क्रामन्ति तत्रैव समवलीयन्ते । विमुक्तश्च विमुच्यत इति मोक्षमेवावस्थाभेदेन p. 49 विभज्य निरूपयति ॥

स्वस्वभावानुरूपा मुक्तिः ॥

या च चित्प्रतिभा दृगादिद्वारानुसरणात् तत्तत्संज्ञाभिधाना जीवभूता । सा च स्वचित्प्रमातृपदारोहणात् तुर्यस्वरूपा स्वातन्त्र्योन्मीलनतारतम्याद् यादृक्स्वभावमादत्ते तादृग्मुक्तिः । यथा हि पुरुषपदारूढाः प्रकृतिस्वतन्त्राः सिद्धाः सिद्धपदवीमारुह्य यथेष्टं पिण्डं धारयन्ति ।
सर्वैश्वर्यसम्पत्परिपूर्णचैतन्यस्वरूपात्मभूताः पञ्चभूतानि पञ्चभूतेषु योजयित्वा निरावरणस्वभावाश्चिदाकाशस्वरूपाः कचकचायन्ति । यथा शुकदेवादयः ईश्वरपदारूढा महामायास्वतन्त्राश्चित्प्रकाशशरीररचनां यथारुचिं] रचयन्ति ॥ p. 50 अहमेव परानन्दनिर्भरितवपुः सदानन्दलवाश्रिता आनन्दिनः सर्वे प्रमातारः

आनन्दादेव खल्विमानि भूतानि जायन्ते इति श्रुत्या य आनन्दः सर्वत्र पोषकः सर्वोत्कर्षेण विराजमानो ब्रह्मादिभिरभिवाञ्छनीयस्तेन मत्स्वभावभूतेन स्वात्मन्येव रमामि । अमितचमत्कारपूर्विकां विश्वमयविश्वोत्तीर्णां क्रीडां यथेष्टं सम्पादयामि ।

तदाह

नायको मध्यसंस्थः ॥

ईशनसंवेदन >>> जानामीत्यान्तरोच्छलनसंपादनस्मृत्यपोहनाभिमानाध्यवसायसङ्कल्पप्राणान्तःसङ्जल्प तत्तच्छब्दस्फुरणबुद्धीन्द्रियकर्मेन्द्रिया तत्तत्स्पन्दनरूपा अनन्तशक्तयः तासां मध्ये स्वप्रकाशन्ति p. 51 >>> । यथा हरिहरादयः विगलितदेहाभिमाना मायाप्रकृत्युदासीना आनन्दपदविश्रान्ताः पञ्चभौतिकं शरीरमिहैवान्त्यावसरे परित्यज्य क्षीरे क्षीर इव परे व्योम्नि लीना भवन्ति एवं चतुष्टये मोक्षप्रकारे तारतम्यादत्राप्यनन्तभेदे यथा भुवनाधिपतित्वादियुक्तानामत्र परमेश्वरशक्तिपात एव निबन्धनमिति शिवम् ॥

इति श्रीमहामहेश्वराचार्यवर्यविरचितायां स्वातन्त्र्यदीपिकायां जीवन्मुक्तस्वरूपनिरूपणं नाम तृतीयोल्लासः ॥

.ओ अथ तुर्योल्लासनिर्णये पारमेश्वरस्वस्वभावः परामर्शो गीयते ॥

मुदितस्वभावो p. 52 स्वभावो भिन्नाश्रयभूतो नायकः प्रभुरहमेव सम्यक्स्थितः तत्तन्मुखेन व्यापृतोऽपि चमत्कुर्वन्नपि स्वस्थाने महावीर्यात्मकेऽच्युतस्थितिरेव न हि तत्तदवस्थाभेदेन समाच्युतानन्दस्वभावस्यान्यथाभावः एते हि प्रविशन्तस्तत्तद्वृत्तिगुणा मम निर्विकल्पस्वरूपस्य न नदीवेगा इवोदधेस्तरङ्गयमानत्वं न प्रापयन्ति एवं स्वभावस्थितेस्तच्छक्तेश्वरपदारूढो न स्तमितभास्वरूपो महावीरः स्वप्रकाशनशक्त्या तत् सर्वं प्रकाशयामीति दर्शयति ॥

स्वशक्तिकचनम् ॥

मत्स्वभावभूताहमिति स्वातन्त्र्यपरामर्शात्मा पराशक्तिर्युगपदुन्मेषनिमेषधर्मत्वात् तत्तदनन्तशक्तिवृन्दं भित्तिभूतान्निजस्वरूपात् स्वेच्छयैवोन्मीलयित्वा p. 53 तत्स्फुरणात्मकतया स्वप्रकाशस्वरूपे

महाव्योमाकारे स्वात्मन्येव कचकचायते तस्या मरीचयस्तत्स्थाने तत्तद्व्यापारात्मा तत्तच्छक्त्यभिधाना न हि तद्व्यतिरिक्तं किञ्चित् । सा हि निष्क्रियत्वेन तत्तत्स्वभावक्रीडनात्मने तत्तद्व्यापारे निवृत्तसङ्गमाद् मद्विश्रान्तिभाजतया सर्वप्राणनस्वरूपया तासां मत्सेवनपराणां निमेषोन्मेषव्यापारसाक्ष्यहमेव स्वतन्त्रस्तदाह ॥

अवस्थाद्वये वीरः ॥

सर्वासामुपसंहृतवृत्तीनां शक्तीनामेकसङ्घट्टप्रसरावसरे तत्तत्स्थाने विशीर्णस्वरूपो योऽन्तर्बहिर्निमेषोन्मेषस्तस्मिन् स्वातन्त्र्येऽहमेव शिवो निजैश्वर्यबलात् सदाशिवेश्वरो p. 54 भूत्वा तासां निमेषोन्मेषात्मकमवस्थाद्वयं यथेष्टं सम्पादयामि । न हि मद्व्यतिरिक्तं किञ्चित् यतः ॥

मदभिमतमृतम् ॥

अहं प्रत्यवमर्शात्मकस्य प्रकाशानन्दस्वभावस्य मम स्वरूपं भूत्वा सत्ता स्फुरत्तास्वरूपा परासंविच्छक्तिः तया यद् यत् किञ्चिद् बाह्यमाभ्यन्तरं वा प्रकाशितं तत् तदेव धतं >>> प्राप्तं मद्भावमहमेव संविन्नाथो निजसंवित्प्रकाशवैभवादाब्रह्मादिपिपीलिकान्तं प्रमातृप्रमाणप्रमेयात्मकमिदं विश्वं भित्तिभूते स्वात्माकाशे प्रकाशयित्वा तत्तत्स्वरूपत्वेन तत्तत्संज्ञाभिधानः स्फुरामि तदाह ॥

संज्ञम्पदैकः ॥

नाहन्तादिपरामर्शभेदादस्यान्यतात्मनः p. 55 अहंमृष्यतयैवास्य सृष्टेस्तिज्वा >>>> च कर्मवदिति नीत्या तत्तदवस्था स्वरूपे प्रमाणप्रमेयात्मके विश्ववैचित्र्ये सर्वानुप्राणनस्वरूपः परः प्रमातैक एवाहं स्वच्छन्दस्वभावान्नट इव रमामि न च तत्तद्दशासु मत्स्वभावस्यान्यथाभावः अहं प्रत्यवमर्शैकस्वभावत्वात् । अहंप्रत्ययः सर्वत्राप्रतिहतस्वभावः सर्वत्र चोदकः एतदेव स्फुटीकरोति ॥

मदाज्ञाधीनं सर्वम् ॥

अहमेव स्वशक्तिवैभवं सर्वत्र यथायोग्यं स्फारयित्वा त्रिषु लोकेषु सम्माडिव रमामि न हि मच्चोदनादृते कश्चित् कुत्रापि स्वव्यापारे प्रवर्तते । अहमेव सर्वानुप्राणनस्वरूपया निजशक्त्या p. 56 तत्तत्स्थाने तत्तद्देवतास्वरूपो भूत्वा क्रमाक्रमात्मकं तत्तद्व्यापारं यथेष्टं करोमि । न च तत्तद्दशाव्यापारे मम परानन्दात्मके स्वभावे कश्चित् क्षोभः स्वतन्त्रस्य न क्वापि चलनमस्ति । तदाहुः

पूर्णोऽहं तुष्टः ॥

अहमेव तत्तद्दशासु व्याप्यव्यापकस्वरूपत्वान्निजविभूतिस्फारविस्मयचमत्कारपरामर्शरसेन परिपूरितवपुः गम्भीराक्षुब्धस्वभावे स्वात्मन्येव सन्तुष्टः अत एव
विगलितसमस्तक्षोभकलङ्कित्वान्नित्योदितसच्चिदानन्दस्वभावो विश्वमयत्वेऽपि विश्वोत्तिर्णो मत्स्वरूपः सर्वोत्कर्षेण विराजते ।
अत अह

उपाधिरहितं मद्रूपम् ॥

p. 57 शत्रुमित्रगृहदारादिबन्धमोक्षपरिणामनरशक्तिशिवात्मकजीवेश्वरब्रह्मकल्पना स्वरूपा या उपाधिस्तद्रहितं विशुद्धनिर्मलं महाकाशं मद्रूपम् । अहंप्रत्यवमर्शात्मकं परमानन्दसंवित्स्वभावमहमेव निरुपाधिस्वरूपत्वाच्चण्डभास्कर इव स्वप्रशान्तपदे स्थित्वा विश्वमयतदुत्तीर्णक्रीडाचमत्कारं चमत्कारोमि । यतः

शिवोऽहं स्वतन्त्रः ॥

अहमेव महाकाशस्वरूपः परमानन्दघनश्चैतन्यदेवो विश्वमयत्वेऽपि विश्वोत्तिर्णो विश्वोत्तीर्णत्वेऽपि विश्वमयः स्वभावां स्वशक्ति स्फारात्मिकां क्रीडां क्रमाक्रमस्वरूपत्वेन यथारुचिं रचयित्वा स्वप्रभाप्रसरात्मके विशुद्धपरमाकाशे स्वात्मन्येव स्वस्वातन्त्र्यप्रकर्षाद् विराजे स्वातन्त्र्यात्मा राजमानो स्वभाहित्वा हृयाभ्यन्तरक्षीबितश्चिद्रसेन शक्तिपीठे यामलवृत्तिलुब्धो महानन्दो भैरवोऽहं शिवोऽहमिति शिवम् ॥

इति श्रीमहामाहेश्वराचार्यवर्यविरचितायां स्वातन्त्र्यदीपिकायां स्वातन्त्र्यशक्त्युच्छलनं नाम चतुर्थोल्लासः ॥

महामाहेश्वराचार्यमन्सारामेन निर्मिता जनानामुपकारार्थमियं स्वातन्त्र्यदीपिका ॥